दिनांक 10-6-21 उपशास्त्री प्रथम वर्ष, विषय-व्याकरण
ग्रन्थ-सिद्धान्तकौमुदी, हलन्त पुल्लिङ्ग प्रकरणम्

1 - यूनः - युवन् शब्दात् अर्थवदिति सूत्रेण प्रातिपदिक संज्ञायाम्, स्वौजस इति सूत्रेण तथा बहुषु बहुवचनम् इति सूत्र सहकारेण शस् विभक्तौ अनुबन्ध लोपे। श्वयुवमघोनामतद्धिते इति सूत्रेण संप्रसारणे। संप्रसारणाच्च इति पूर्वरूपे प्राप्ते। न संप्रसारणे संप्रसारणम् इति सूत्रेण निषेधे, यु उ अन् इति दशायां उकारयोः स्थाने सवर्णदीर्घे, सस्य रुत्वे विसर्गे यूनः इति सिद्धम्।

2 अर्वन्तौ - अर्वन् शब्दात् अर्थवदिति प्रातिपदिक संज्ञायां, स्वौजस इति सूत्रेण तथा द्व्येकयोर्द्विवचनैकवचने इति सूत्र सहकारेण औ विभक्तौ। अर्वणस्त्रसावनञः इति सूत्रेण तृ अन्तादेशे अनुबन्ध लोपे। उगिदचां सर्वनामस्थानेऽधातोः इति सूत्रेण नुमागमे अनुबन्ध लोपे। अर्वन्तौ इति सिद्धम्।

3 - पन्थाः - पथिन् शब्दात् अर्थवदिति सूत्रेण प्रातिपदिकसंज्ञायाम्। स्वौजस इति सूत्रेण तथा द्व्येकयोर्द्विवचनैकवचने इति सूत्र सहकारेण सु विभक्तौ अनुबन्ध लोपे। पथिमथ्यृभुक्षामात् इति सूत्रेण आत्वे अनुबन्ध लोपे। पथ आ स् इति दशायां थो न्थः इति सूत्रेण थकारस्य स्थाने न्थादेशे। अनुबन्ध लोपे। पन्थ आ स इति दशायां सवर्णदीर्घे सकारस्य स्थाने रुत्वे विसर्गे पन्थाः इति सिद्धम्।

4 पथः - पथिन् शब्दात् अर्थवदिति सूत्रेण प्रातिपदिकसंज्ञायाम्। स्वौजस इति सूत्रेण तथा द्व्येकयोर्द्विवचनैकवचने इति सूत्र सहकारेण शस् विभक्तौ अनुबन्ध लोपे। भत्वात् टि (इन्) भागस्य टि लोपे। पथ् अस् इति दशायां सस्य रुत्वे विसर्गे पथः इति सिद्धम्।

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म० वि०
गुलसैना प्राणीपा

शक्तिजन्यज्ञाने पदोपस्थितिं विनापि लक्षणाजन्योपस्थितेः शाब्दबोधात्। न चाभाव
हितोत्तरत्वसम्बन्धेन शक्तिज्ञानजन्योपस्थितिविशिष्टशाब्दबुद्धित्वम् कार्यतावच्छेदकम्
शक्ति ~~ज्ञान~~ जन्योपस्थितत्वं लक्षणाज्ञानजन्योपस्थितित्वञ्च कारणतावच्छेदकमिति
वाच्यम्। अनन्तकार्यकारणभावप्रसङ्गात्। नित्यानन्दपर्वतीयपदस्य प्रवाहादि
सम्बन्धितत्वे नोपस्थापकत्वाद्यो गङ्गापदः 'सर्वे सर्वार्थवाचकाः' इति भाष्यात्
सामान्यतः पूर्वमेव ज्ञानः शक्तिरूपः सम्बन्ध एव कल्पनीयो न तु शक्य
सम्बन्धरूपः। तथा सति तयोरुभयोः शाब्दबोधजनकपदार्थोपस्थितिजनक
पदार्थसम्बन्धत्वरूपं शाब्दबोधजनकपदार्थसम्बन्धत्वरूपं शाब्दबोध-
जनकपदार्थसम्बन्धत्वरूपं वा वृत्तित्वं कल्पनीयम्। शाब्दबोधकारणता
वच्छेदकत्वम् उपस्थितकारणतावच्छेदकत्वं च शक्तत्वशक्यसम्बन्धयो
रुभयोः कल्पनीयमिति गौरवम्। शक्तिकल्पनापक्षे तु तस्या एव वृत्तित्व
कल्पनम्, तस्यैव च तदवच्छेदकत्वकल्पनमिति लाघवम्।
तन्मते अन्यदपि गौरवं भूषणादौ स्पष्टं प्रतिपादितम्। तत एवावगन्तव्यम्।
व्यवहारादिना गङ्गापदादौ तीरादिशक्तेः पूर्वं विशेषरूपेणाग्रहेणानेन
निर्वाहसंभवे लक्षणावृत्तिप्रयुक्तकार्यकारणादि स्वीकारे अतिरिक्त
गौरवस्य दुरुद्धरत्वादिति भावः। गौरवाच्च पूर्वमेव निरूपितम्। अधिकं
वैयाकरणभूषणादौ विवेचितं तत एवावधेयम्।

तथाहि शक्तिर्द्विविधा प्रसिद्धाऽप्रसिद्धा च आमन्दबुद्धिवेद्यत्वं
प्रसिद्धत्वम्। सहृदयहृदयमात्रवेद्यत्वं प्रसिद्धत्वम्। सहृदय
हृदयमात्रवेद्यत्वमप्रसिद्धत्वम्। तत्र गङ्गादिपदानां प्रवाहादौ
प्रसिद्धा शक्तिः, तीरादौ चाप्रसिद्धेति किमनुपपन्नम्?

ननु सर्वे सर्वार्थवाचका इति चेत् ब्रूषे तर्हि घटपदात् पटप्रत्ययः
किन्न स्यादिति चेन्न। सति तात्पर्ये इष्टत्वात् तात्पर्याभावादिति
गृहाण। तात्पर्यं चात्र ईश्वरदेवतामहर्षिलोकवृद्धपरम्परातोऽस्मदादि
भिर्ज्ञेयमिति सर्वं सुन्दरम्।

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म० वि०
सुखसेना पूर्णिया

(दिनांक 10-6-24) शास्त्री तृतीय खण्ड - विषय - व्याकरण

ग्रन्थ - परम लघु मञ्जूषा

प्रश्न - तार्किक मते लक्षणाभेदं प्रतिपाद्य लक्षणावृत्ति खण्डन पूर्वक शाब्दिक मतं लेख्यः

उत्तर - असति प्रयोजने शक्य सम्बन्धो निरूढा लक्षणा। यथा ज्ञातमित्यादौ यथा त्वच स्वगिन्द्रिये। इयं च शक्य पदपर्यायैति बोध्यम्। गंगायां घोष इत्यत्र तीरे गङ्गागत शैत्य पावनत्वादि प्रतीतिः प्रयोजनम्। कुन्ताः प्रविशन्ति इति अत्र पदतापमान वाच्ये कुन्तविशिष्ट पुरुषे कुन्तगत तैक्ष्ण्य प्रतीतिः प्रयोजनम्। एवं च गौर्वाहीक इत्यत्र सादृश्यं लक्षणतावच्छेदकं गौणभेदत्वात्।

अर्थात् — कविसंप्रदायानुसारेण अर्थः। प्रयोजनाभावे शक्यार्थ बाध प्रतिसंधान पूर्वकं शक्यार्थ लक्षणा। वस्तुतस्तु इयं शक्तिरेव बोध्या। गौर्वाहीक प्रत्यायनं फलम् बोध्यम्। कुन्तविशिष्ट पुरुषे कुन्तानामिव तीक्ष्णता प्रतीति प्रयोजनम्। एषु प्रयोजनवती लक्षणा।

तन्न सति तात्पर्ये सर्वे सर्वार्थ वाचकाः इति भाष्य लक्षणाया अभावात्। वृत्ति द्वयावच्छेदक द्वय कल्पने गौरवात्। जघन्य वृत्ति कल्पनाया अन्याय्यत्वाच्च। अपि तर्हि गङ्गादि पदात् तीर प्रत्ययः? इत्यत्रोच्यते सति तात्पर्ये सर्वे सर्वार्थ वाचका इति भाष्ये कथनात्।

भावार्थ:- अत्र तार्किका सर्वे शब्दाः सर्वार्थ वाचकाः सर्व गम्य अभिधा इति भाष्य कथनेन लक्षणा नास्त्येव भाष्यानुसारं गङ्गापदं यथा जलप्रवाह विशेषे शक्तं तथैव तीरेऽपि, एवं चातिरिक्त वृत्ति स्वीकार प्रयुक्तं न गौरवम्। न चैवं स्वीकारे गङ्गापदेन घटादेः उपस्थित्यापत्तिः। तात्पर्यस्य शक्ति नियामकत्वेन यथा तात्पर्याभावेन न तद्बोधापत्तिः वस्तु शक्यत्वात्। अर्थात् लक्षणा स्वीकारे शाब्द बोधं प्रति शक्तिजन्या पदोपस्थितिः लक्षणाजन्योपस्थितिश्च कारणत्वं वाच्यम् इति कार्यकारण भावद्वय कल्पने गौरवम्। शक्तिमात्र स्वीकारे वैयाकरणमते शक्तिजन्योपस्थितेः नैव हेतुतेति लाघवम्। किञ्च लक्षणावृत्ति स्वीकारे कार्यकारणभावस्य प्रत्येकं व्यभिचारः। शक्तिजन्योपस्थितिं विनापि लक्षणाजन्योपस्थितेः शाब्दबोधात्। न चाव्यवहितोत्तरत्व सम्बन्धेन